अष्टमः पाठः

८

# पुनः मूषकः भव



मूषकः धावति।

बिडालः मूषकम् अनुधावति।

भीतः मूषकः ऋषिसमीपं गच्छति।

मूषकः वदति "मम रक्षणं करोतु"।

ऋषिः वदति "बिडालः भव"।

मूषकः बिडालः भवति।





बिडालः धावति।

श्वानः बिडालम् अनुधावति।

भीतः बिडालः ऋषिसमीपं गच्छति।

बिडालः वदति "मम रक्षणं करोतु"।

ऋषिः वदति "श्वानः भव" ।

बिडालः श्वानः भवति।





श्वानः धावति।

व्याघ्रः श्वानम् अनुधावति।

भीतः श्वानः ऋषिसमीपं गच्छति।



श्वानः वदति ''मम रक्षणं करोतु''।

ऋषिः वदति ''व्याघ्रः भव'' ।

श्वानः व्याघ्रः भवति।



व्याघ्रः क्षुधितः भवति।

सः ऋषिं वदति–

''अहं त्वां खादामि''।



ऋषिः हसति ''मां खादसि? पुनः मूषकः भव''।

व्याघ्रः मूषकः भवति।

मूषकः पलायनं करोति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
| --- | --- | --- |
| मूषकः | उन्दुरुः | चूहा |
| धावति | धावनं करोति | दौड़ता है |
| बिडालः | मार्जारः | बिलाव |
| अनुधावति | पृष्ठतः धावति | पीछे दौड़ता है। |
| भीतः | त्रस्तः | डरा हुआ |
| श्वानः | कुक्कुरः | कुत्ता |
| व्याघ्रः | हिंसकजन्तुविशेषः | बाघ |
| क्षुधितः | बुभुक्षितः | भूखा |
| पलायनं करोति | दूरं गच्छति। | भाग जाता है। |

## अभ्यासः

**१. उच्चारणं कुरुत–**

| | | | |
| --- | --- | --- | --- |
| मूषकः | बिडालः | रक्षणम् | श्वानः |
| व्याघ्रः | क्षुधितः | त्वाम् | माम् |

**२. एकेन पदेन उत्तरत –**

(क) भीतः मूषकः कुत्र गच्छति?

(ख) श्वानः कम् अनुधावति?

(ग) कः श्वानम् अनुधावति?

(घ) 'अहम् त्वां खादामि' इति व्याघ्रः कं वदति?

(ङ) कः पलायनं करोति ?

**३. उदाहरणमनुसृत्य कोष्ठकस्य साहाय्येन वाक्यानि रचयत –**

उदाहरणम् – व्याघ्रः श्वानं अनुधावति।

| | | | |
| --- | --- | --- | --- |
| बिडालः<br>कृषकः<br>छात्रः<br>कच्छपः | मूषकं<br>वृषभं<br>शिक्षकं<br>शशकं | अनु | धावति।<br>गच्छति।<br>लिखति।<br>चलति। |

**४. एकवचन-वाक्यानां द्विवचने बहुवचने च परिवर्तनं कुरुत -**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **यथा**- | (क) बिडालः अनुधावति। | बिडालौ अनुधावतः। | बिडालाः अनुधावन्ति। |
| | (ख) श्वानः धावति। | ........................ | ........................ |
| | (ग) मूषकः वदति। | ........................ | ........................ |
| | (घ) व्याघ्रः भवति। | ........................ | ........................ |
| | (ङ) अहं खादामि। | ........................ | ........................ |

**५. रेखाङ्कितपदम् आधृत्य प्रश्न-निर्माणं कुरुत -**

(क) बिडालः मूषकं अनुधावति।


(ख) श्वानः बिडालं अनुधावति।


(ग) मूषकः पलायनं करोति।

(घ) ऋषिः वदति।

## योग्यता-विस्तारः

**१. ध्यानेन पश्यत -**






**चित्राणां साहाय्येन मञ्जूषातः उचितं पदं चित्वा कथां पूरयत –**

| जलम्, उद्यानम्, घटम्, पिबति, उपरि, स्थापयति, शिलाखण्डान् |
|---|

एकः काकः भवति। सः पिपासितः भवति। सः जलस्य अन्वेषणं करोति। सः एकम् ...................... गच्छति। तत्र एकं ...................... पश्यति, किन्तु घटे ...................... अल्पं भवति। सः एकम् उपायं करोति। सः ...................... आनयति, घटे ...................... । जलम् ...................... आगच्छति। काकः जलं ...................... । सः प्रसन्नः भवति।

२. अस्मिन् पाठे युष्माभिः चित्राणां माध्यमेन कथा पठिता । कथायाः पठनेन युष्माभिः आनन्दः प्राप्तः स्यात् । वस्तुतः कथानां पठनं सर्वेषां कृते आनन्ददायकं रुचिकरं च भवति एव ।

संस्कृतभाषायाम् अपि बहवः कथाग्रन्थाः सन्ति, येषु अनेकाः आनन्ददायिन्यः शिक्षाप्रदाः रोचकाः च कथाः लिखिताः सन्ति । प्रसिद्धानां कथाग्रन्थानां, तेषां लेखकानां च नामानि अत्र दीयन्ते–

| | **ग्रन्थः** | **लेखकः** |
|---|---|---|
| १. | पञ्चतन्त्रम् | विष्णु शर्मा |
| २. | हितोपदेशः | नारायणपण्डितः |
| ३. | कथासरित्सागरः | सोमदेवः |
| ४. | पुरुषपरीक्षा | विद्यापतिः |
| ५. | जातकमाला | आर्यशूरः |

इतोऽपि शुकसप्ततिः, वेतालपञ्चविंशतिका, सिंहासनद्वात्रिंशिका इत्यादयः कथाग्रन्थाः सन्ति। युष्माकम् अध्यापकेन सह एतेषां ग्रन्थानां विषये चर्चां कुरुत ।